# .. raamaaShTottarashatanaama stotraM ..

# ॥ रामाष्टोत्तरशतनाम स्तोत्रं ॥

॥ अथ श्रीमदानन्दरामायणान्तर्गत श्री
रामाष्टोत्तरशतनाम स्तोत्रम् ॥

श्री कुंभोदर उवाच-
अष्टोत्तरशतं नाम्नां तस्य स्तोत्रं वदांयहम् ।

अस्य श्री रामचन्द्र नामाष्टोत्तर शतमन्त्रस्य ब्रह्मा ऋषिः ।
अनुष्टुप् छन्दः ।
जानकीवल्लभः श्रीरामचन्द्रो देवता ।
ॐ बीजम् ।
नमः शक्तिः ।
श्री रामचन्द्रेति कीलकम् ।
श्री रामचन्द्र प्रीत्यर्थे जपे विनियोगः ॥

करन्यासः ॥
ॐ नमो भगवते राजाधिराजाय परमात्मने अङ्गुष्ठाभ्यां नमः ।
ॐ नमो भगवते विद्याधिराजाय हयग्रीवाय तर्जनीभ्यां नमः ।
ॐ नमो भगवते जानकी वल्लभाय नमः मध्यमाभ्यां नमः ।
ॐ नमो भगवते रघुनन्दनाय अमिततेजसे अनामिकाभ्यां नमः ।
ॐ नमो भगवते क्षीराब्धिमध्यस्थाय नारायणाय
कनिष्ठिकाभ्यां नमः ।
ॐ नमो भगवते सत्प्रकाशाय रामाय करतल
करपृष्ठाभ्यां नमः ॥

अङ्गन्यासः ॥
ॐ नमो भगवते राजाधिराजाय परमात्मने हृदयाय नमः ।
ॐ नमो भगवते विद्याधिराजाय हयग्रीवाय शिरसे स्वाहा ।
ॐ नमो भगवते जानकी वल्लभाय नमः शिकायै वषट् ।
ॐ नमो भगवते रघुनन्दनाय अमिततेजसे कवचाय हुम् ।
ॐ नमो भगवते क्षीराब्धिमध्यस्थाय नारायणाय नेत्रत्रयाय
वौषट् ।
ॐ नमो भगवते सत्प्रकाशाय रामाय अस्त्राय फट् ।

भूर्भुवःसुवरोमिति दिग्बन्धः ॥

अथ ध्यानम् ॥

मन्दाराकृति पुण्यधाम विलसत् वक्षस्थलं कोमलम्
शान्तं कान्तमहेन्द्रनील रुचिराभासं सहस्रानननम् ।
वन्देहं रघुनन्दनं सुरपतिं कोदण्ड दीक्षागुरुं
रामं सर्वजगत् सुसेवितपदं सीतामनोवल्लभम् ॥

सहस्र शीर्षणे वै तुभ्यं सहस्राक्षायते नमः ।
नमः सहस्र हस्ताय सहस्र चरणाय च ॥१॥
नमो जीमूतवर्णाय नमस्ते विश्वतोमुख ।
अच्युताय नमस्तुभ्यं नमस्ते शेषशायिने ॥२॥
नमो हिरण्यगर्भाय पञ्चभूतात्मने नमः ।
नमो मूल प्रकृतये देवानां हितकारिणे ॥३॥
नमस्ते सर्वलोकेश सर्वदुःख निषूदन ।
शङ्ख चक्र गदापद्म जटा मकुट धारिणे ॥४॥
नमो गर्भाय तत्त्वाय ज्योतिषां ज्योतिषे नमः ।
ॐ नमो वसुदेवाय नमो दशरथात्मज ॥५॥
नमो नमस्ते राजेन्द्र सर्वसम्पत् प्रदाय च ।
नमः कारुण्यरूपाया कैकेयी प्रियकारिणे ॥६॥
नमो दान्ताय शान्ताय विश्वामित्र प्रियाय ते ।
यज्ञेशाय नमस्तुभ्यं नमस्ते क्रतुपालक ॥७॥
नमो नमः केशवाय नमो नाथाय शार्ङ्गिणे ।
नमस्ते रामचन्द्राय नमो नारायणाय च ॥८॥
नमस्ते रामचन्द्राय माधवाय नमो नमः ।
गोविन्दाय नम्स्तुभ्यं नमस्ते परमात्मने ॥९॥
नमो विष्णुस्वरूपाय रघुनाथाय ते नमः ।
नमस्ते नाथनाथाय नमस्ते मधुसूदन ॥१०॥
त्रिविक्रम नमस्तेस्तु सीतायाः पतये नमः ।
वामनाय नमस्तुभ्यं नमस्ते राघवाय च ॥११॥
नमो नमः श्रीधराय जानकी वल्लभाय च ।
नमस्तेस्तु हृषीकेश कन्दर्पाय नमो नमः ॥१२॥
नमस्ते पद्मनाभाय कौसल्या हर्षकारिणे ।
नमो राजीवनयन नमस्ते लक्ष्मणाग्रज ॥१३॥
नमो नमस्ते काकुत्स्थ नमो दामोदराय च ।
विभीषण परित्रातः नमः सङ्कर्षणाय च ॥१४॥

वासुदेव नमस्तेस्तु नमस्ते शङ्करप्रिय ।
प्रद्युम्नाय नमस्तुभ्यं अनिरुद्धाय ते नमः ॥ १५ ॥
सदसत् भक्तिरूपाय नमस्ते पुरुषोत्तम ।
अधोक्षज नमस्तेस्तु सप्तताल हराय च ॥ १६ ॥
खरदूषण संहर्त्रे श्रीनृसिंहाय ते नमः ।
अच्युताय नमस्तुभ्यं नमस्ते सेतुबन्धक ॥ १७ ॥
जनार्दन नमस्तेस्तु नमो हनुमदाश्रय ।
उपेन्द्र चन्द्रवन्द्याय मारीच मथनाय च ॥ १८ ॥
नमो वालिप्रहरण नमः सुग्रीव राज्यद ।
जामदग्न्य महादर्प हराय हरये नमः ॥ १९ ॥
नमो नमस्ते कृष्णाय नमस्ते भरताग्रज ।
नमस्ते पितृभक्ताय नमः शत्रुघ्नपूर्वज ॥ २० ॥
अयोध्याधिपते तुभ्यं नमः शत्रुघ्न सेवित ।
नमो नित्याय सत्याय बुद्ध्यादि ज्ञानरूपिणे ॥ २१ ॥
अद्वैत ब्रह्मरूपाय ज्ञानगम्याय ते नमः ।
नमः पूर्णाय रम्याय माधवाय चिदात्मने ॥ २२ ॥
अयोध्येशाय श्रेष्ठाय चिन्मात्राय परात्मने ।
नमोहल्योद्धारणाय नमस्ते चापभञ्जिणे ॥ २३ ॥
सीतारामाय सेव्याय स्तुत्याय परमेष्ठिने ।
नमस्ते बाणहस्ताय नमः कोदण्ड धारिणे ॥ २४ ॥
नमः कबन्ध हन्त्रे च वालिहन्त्रे नमोस्तुते ।
नमस्तेस्तु दशग्रीव प्राण संहार कारिणे ॥ २५ ॥
अष्टोत्तरशतं नाम्नां रामचन्द्रस्य पावनम् ।
एतत् प्रोक्तं मया श्रेष्ठं सर्वपातक नाशनम् ॥ २६ ॥
प्रचरिष्यति तल्लोके प्राण्यदृष्टवशाद्द्विज ।
तस्य कीर्तनमात्रेण जना यास्यन्ति सद्गतिम् ॥ २७ ॥
तावद् विजृंभते पापं ब्रह्महत्या पुरस्सरम् ।
यावन्नामाष्टक शतं पुरुषो न हि कीर्तयेत् ॥ २८ ॥
तावत् कलेर् महोत्साहो निःशङ्कं संप्रवर्तते ।
यावत् श्रीरामचन्द्रस्य शतं नाम्नां न कीर्तितम् ॥ २९ ॥
तावत् स्वरूपं रामस्य दुर्बोधं प्राणिनां स्फुटम् ।
यावन् न निष्ठया रामनाम माहात्म्य मुत्तमम् ॥ ३० ॥
कीर्तितं पठितं चित्ते धृतं संस्मारितं मुदा ।
अन्यतः श्रुणुयान् मर्त्यः सोपि मुच्येत पातकान् ॥ ३१ ॥
ब्रह्महत्यादि पापानां निष्कृतिं यदि वाञ्छति ।
रामस्तोत्रं मासमेकं पठित्वा मुच्यते नरः ॥ ३२ ॥

दुष्प्रतिग्रह दुर्भोज्य दुरालापादि संभवम् ।
पापं सकृत् कीर्तनेन रामस्तोत्रं विनाशयेत् ॥ ३३॥
श्रुति स्मृति पुराणेतिहासागम शतानि च ।
अर्हन्ति नाल्पां श्रीरामनाम कीर्तिकलामपि ॥ ३४॥
अष्टोत्तरशतं नाम्नां सीतारामस्य पावनम् ।
अस्य सङ्कीर्तनादेव सर्वान् कामान् लभेन्नरः ॥ ३५॥
पुत्रार्थी लभते पुत्रान् धनार्थी धनमाप्नुयात् ।
स्त्रियं लभति पत्न्यर्थी स्तोत्रपाठ श्रवादिना ॥ ३६॥
कुंभोदरेण मुनिना येन स्तोरेण राघवः ।
स्तुतः पूर्वं यज्ञवाटे तदेतत् त्वां मयोदितम् ॥ ३७॥

इति श्रीशतकोटि रामचरितांतर्गत
श्रीमदानन्दरामायणे वाल्मिकीये यागकाण्डे
श्रीरामनामाष्टोत्तर शतनाम स्तोत्रं संपूर्णम् ॥

---

Encoded and proofread by Antaratma antaratma at Safe-mail.net

---

Please send corrections to sanskrit@cheerful.com
Last updated July 5, 2006